# Uddhava KritaM shrIrAdhAstotram

# ઉદ્ધવકૃતં શ્રીરાધાસ્તોત્રમ્

## Document Information

Text title : uddhava kritaM shriiraadhaastotram

File name : rAdhAuddhavaStr.itx

Category : devii, rAdhA, stotra, devI

Location : doc_devii

Author : uddhava

Transliterated by : Daniel Mohanpersad (danielmohanpersad98 at msn.com)

Proofread by : Daniel Mohanpersad (danielmohanpersad98 at msn.com)

Description-comments : brahmavaivartapurANa | shrIkRiShNajanma, uttarabhAga | adhyAya 92/64-94||

Latest update : August 15, 2002, July 2, 2011

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 18, 2024

*sanskritdocuments.org*

# ઉદ્ધવકૃતં શ્રીરાધાસ્તોત્રમ્

ઉદ્ધવ ઉવાચ ।
વન્દે રાધાપદામ્ભોજં બ્રહ્માદિસુરવિન્દતમ્ ।
યત્કીર્તિઃ કીર્તનેનૈવ પુનાતિ ભુવનત્રયમ્ ॥ ૬૪॥

નમો ગોકુલવાસિન્યૈ રાધિકાયૈ નમો નમઃ ।
શતશૃઙ્ગનિવાસિન્યૈ ચન્દ્રાવત્યૈ નમો નમઃ ॥ ૬૫॥

તુલસીવનવાસિન્ય વૃન્દારણ્યૈ નમો નમઃ ।
રાસમણ્ડલવાસિન્યૈ રાસેશ્વર્યૈ નમો નમઃ ॥ ૬૬॥

વિરજાતીરવાસિન્યૈ વૃન્દાયૈ ચ નમો નમઃ ।
વૃન્દાવનવિલાસિન્યૈ કૃષ્ણાયૈ ચ નમો નમઃ ॥ ૬૭॥

નમઃ કૃષ્ણપ્રિયાયૈ ચ શાન્તાયૈ ચ નમો નમઃ ।
કૃષ્ણવક્ષઃસ્થિતાયૈ ચ તત્પ્રિયાયૈ નમો નમઃ ॥ ૬૮॥

નમો વૈકુણ્ઠવાસિન્યૈ મહાલક્ષ્મ્યૈ નમો નમઃ ।
વિદ્યાધિષ્ઠાતૃદેવ્યૈ ચ સરસ્વત્યૈ નમો નમઃ ॥ ૬૯॥

સર્વૈશ્વર્યાધિદેવ્યૈ ચ કમલાયૈ નમો નમઃ ।
પદ્મનાભપ્રિયાયૈ ચ પદ્માયૈ ચ નમો નમઃ ॥ ૭૦॥

મહાવિષ્ણોશ્ચ માત્રે ચ પરાદ્યાયૈ નમો નમઃ ।
નમઃ સિન્ધુસુતાયૈ ચ મર્ત્યલક્ષ્મ્યૈ નમો નમઃ ॥ ૭૧॥

નારાયણપ્રિયાયૈ ચ નારાયણ્યૈ નમો નમઃ ।
નમોઽસ્તુ વિષ્ણુમાયાયૈ વૈષ્ણવ્યૈ ચ નમો નમઃ ॥ ૭૨॥

મહામાયાસ્વરૂપાયૈ સમ્પદાયૈ નમો નમઃ ।
નમઃ કલ્યાણરૂપિણ્યૈ શુભાયૈ ચ નમો નમઃ ॥ ૭૩॥

માત્રે ચતુર્ણાં વેદાનાં સાવિત્ર્યૈ ચ નમો નમઃ ।

નમોઽસ્તુ બુદ્ધિરૂપાયૈ જ્ઞાનદાયૈ નમો નમઃ ॥ ૭૪॥

નમો દુર્ગવિનાશિન્યૈ દુર્ગાદેવ્યૈ નમો નમઃ ।
તેજઃસુ સર્વદેવાનાં પુરા કૃતયુગે મુદા ॥ ૭૫॥

અધિષ્ટાનકૃતાયૈ ચ પ્રકૃત્યૈ ચ નમો નમઃ ।
નમસ્ત્રિપુરહારિણ્યૈ ત્રિપુરાયૈ નમો નમઃ ॥ ૭૬॥

સુન્દરીષુ ચ રમ્યાયૈ નિર્ગુણાયૈ નમો નમઃ ।
નમો નિદ્રાસ્વરૂપાયૈ નિર્ગુણાયૈ નમો નમઃ ॥ ૭૭॥

નમો દક્ષસુતાયૈ ચ નમઃ સત્યૈ નમો નમઃ ।
નમઃ શૈલસુતાયૈ ચ પાર્વત્યૈ ચ નમો નમઃ ॥ ૭૮॥

નમો નમસ્તપસ્વિન્યૈ હ્યુમાયૈ ચ નમો નમઃ ।
નિરાહારસ્વરૂપાયૈ હ્યપર્ણાયૈ નમો નમઃ ॥ ૭૯॥

ગૌરીલૌકવિલાસિન્યૈ નમો ગૌર્યૈ નમો નમઃ ।
નમઃ કૈલાસવાસિન્યૈ માહેશ્વર્યૈઃ નમો નમઃ ॥ ૮૦॥

નિદ્રાયૈ ચ દયાયૈ ચ શ્રદ્ધાયૈ ચ નમો નમઃ ।
નમો ધૃત્યૈ ક્ષમાર્યૈ ચ લજ્જાયૈ ચ નમો નમઃ ॥ ૮૧॥

તૃષ્ણાયૈ ક્ષુત્સ્વરૂપાયૈ સ્થિતિકર્ત્ર્યૈ નમો નમઃ ।
નમઃ સંહારરૂપિણ્યૈ મહામાર્યૈ નમો નમઃ ॥ ૮૨॥

ભયાયૈ ચાભયાયૈ ચ મુક્તિદાયૈ નમો નમઃ ।
નમઃ સ્વધાયૈ સ્વાહાયૈ શાન્ત્યૈ કાન્ત્યૈ નમો નમઃ ॥ ૮૩॥

નમસ્તુષ્ટ્યૈ ચ પુષ્ટ્યૈ ચ દયાયૈ ચ નમો નમઃ ।
નમો નિદ્રાસ્વરૂપાયૈ શ્રદ્ધાયૈ ચ નમો નમઃ ॥ ૮૪॥

ક્ષુત્પિપાસાસ્વરૂપાયૈ લજ્જાયૈ ચ નમો નમઃ ।
નમો ધૃત્યૈ ક્ષમાયૈ ચ ચેતનાયૈ નમો નમઃ ॥ ૮૫॥

સર્વશક્તિસ્વરૂપિણ્યૈ સર્વમાત્રે નમો નમઃ ।
અગ્નૌ દાહસ્વરૂપાયૈ ભદ્રાયૈ ચ નમો નમઃ ॥ ૮૬॥

શોભાયૈ પૂર્ણચન્દ્રે ચ શરત્પદ્મે નમો નમઃ ।
નાસ્તિ ભેદો યથા દેવિ દુગ્ધધાવલ્યયોઃસદા ॥ ૮૭॥

યથૈવ ગન્ધભૂમ્યોશ્ચ યથૈવ જલશૈત્યયોઃ ।
યથૈવ શબ્દનભસોર્જ્યોતિઃ સૂર્યકયોર્યથા ॥ ૮૮॥

લોકે વેદે પુરાણે ચ રાધામાધવયોસ્તથા ।
ચેતનં કુરુ કલ્યાણિ દેહિ મામુત્તરં સતિ ॥ ૮૯॥

ઇત્યુક્ત્વા ચોદ્ધવસ્તત્ર પ્રણનામ પુનઃ પુનઃ ।
ઇત્યુદ્ધવકૃતં સ્તોત્રં યઃ પઠેદ્ભક્તિપૂર્વકમ્ ॥ ૯૦॥

ઇહ લોકે સુખં ભુક્ત્વા યાત્યન્તે હરિમન્દિરમ્ ।
ન ભવેદ્બન્ધુવિચ્છેદો રોગઃ શોકઃ સુદારુણઃ ॥ ૯૧॥

પ્રોષિતા સ્ત્રી લભેત્કાન્તં ભાર્યાભેદી લભેત્પ્રિયામ્ ।
અપુત્રો લભતે પુત્રાન્નિર્ધનો લભતે ધનમ્ ॥ ૯૨॥

નિર્ભૂમિર્લભતે ભૂમિં પ્રજાહીનો લભેત્પ્રજામ્ ।
રોગાદ્વિમુચ્યતે રોગી બદ્ધો મુચ્યેત બન્ધનાત્ ॥ ૯૩॥

ભયાન્મુચ્યેત ભીતસ્તુ મુચ્યેતાઽઽપન્ન આપદઃ ।
અસ્પષ્ટકીર્તિઃ સુયશા મૂર્ખો ભવતિ પણ્ડિતઃ ॥ ૯૪॥

ઇતિ શ્રીબ્રહ્મવૈવર્તપુરાણે શ્રીકૃષ્ણજન્મખણ્ડે ઉત્તરે
દ્વિનવતિતમાધ્યાયાન્તર્ગતં ઉદ્ધવકૃતં રાધાસ્તોત્રં
સમાપ્તમ્ ।

બ્રહ્મવૈવર્તપુરાણ । શ્રીકૃષ્ણજન્મ, ઉત્તરભાગ । અધ્યાય ૯૨/૬૪-૯૪॥

brahmavaivartapurANa . shrIkRRiShNajanma, uttarabhAga . adhyAya 92/64-94..

Encoded and proofread by Daniel Mohanpersad, PSA Easwaran

---

*Uddhava KritaM shrIrAdhAstotram*

pdf was typeset on September 18, 2024

Please send corrections to *sanskrit@cheerful.com*